# सम्राजः अशोकस्य सारनाथस्थितः गौणः स्तम्भलेखः

१. देवानां प्रियः ...

२. ....................

३. पाटलिपुत्रे ... (तथा कर्तव्यं, येन न) शक्यः केन अपि सङ्घः भेत्तुम्। यः तु खलु

४. भिक्षुः वा भक्षुणी वा संघं भङ्क्ष्यति, सः अवदातानि दुष्यानि सन्निधाप्य अनावासे

५. आवास्यः। एवम् इदं शासनं भिक्षुसङ्घे च भिक्षुणीसङ्घे च विज्ञापयितव्यम्।

६. एवं देवानां प्रिय आह – ईदृशी च एका लिपिः युष्माकम् अन्तिके भूयात् इति संसरणे निक्षिप्ता;

७. एकां च लिपिम् ईदृशीम् एव उपासकानाम् अन्तिके निक्षिपत। ते अपि च उपासकाः अनूपवसथं यायुः

८. एतत् एव शासनम् विश्वासयितुम्। अनूपवसथं च ध्रुवायाः महामात्रः उपवसथाय

९. याति एतत् एव शासनं (आत्मानं) विश्वासयितुम् आज्ञातुं (ज्ञातुं, बोद्धुं) च। यावत्कं (स्थानं व्याप्य) च युष्माकम् आहारः (प्रदेशः),

१०. सर्वत्र विवासयते यूयं (राजपुरुषम्) एतेन व्यञ्जनेन (अनुशासनानुसारेण)।

११. एवम् एव सर्वेषु कोट्टविषयेषु (दुर्गरक्षितप्रदेशांशेषु) एतेन व्यञ्जनेन विवासयत॥

---

**प्रश्नः – सम्राजः अशोकस्य सारनाथस्तम्भस्य अन्तर्निहितं तात्पर्यं संस्कृतभाषया देवनागरलिप्या च समासेन विवृणुत।**

**उत्तरम्** - भारतवर्षस्य उत्तरप्रदेशराज्यस्य प्रख्यातनगर्याः उत्तरपूर्वस्यां दिश सारनाथ इति स्थानं विराजते। तत्रैव कस्यचित् स्तम्भस्योपरि सम्राजः अशोकस्य सारनाथलिपिः समुपलब्धा अस्ति। अस्य अभिलेखस्य प्रथमतः पङ्क्तित्रयम् सम्पूर्णतः विनष्टम्। चतुर्था पङ्क्तिः अपि क्षयं प्राप्ता। भूम्यन्तभागे प्राप्तस्य अभिलेखांशस्य संरक्षणम् सम्पूर्णतया सम्पादितम्। आदिब्राह्मीलिप्या प्राच्यप्राकृतभाषया च इयं लिपिः विरचिता आसीत्।

महाराजः अशोकः 'देवानां प्रियः प्रियदर्शी' इत्यभिधानेन परिचितः आसीत्। यस्योल्लेखः तस्य अभिलेखान्तरेषु प्राप्यते। अस्यां लिप्यां अशोकस्य राजधान्याः नाम पाटलीपुत्र आसीत् इति विज्ञायते। अस्य अभिलेखस्य अन्तिमेन पङ्क्तिद्वयेन एतत्तु ज्ञायते यत्, राजाज्ञायाः यथा सुप्रचारो भवेत् तदर्थं राजा पाटलीपुत्रस्य महामात्रान् अनुरुद्धवान् यत् इदम् अनुशासनम् न केवलं पाटलीपुत्रे अपि तु तस्याः पार्श्वस्थितेषु प्रदेशेषु तथा राजधानीपरिवृते अरण्यप्रदेशे अपि येन प्रकारेण प्रचलेत् तदर्थं प्रयत्नः कर्तव्यः। अनुशासनस्य एतत्तु मुख्यम् उद्देश्यम् आसीत् यत् केनापि प्रकारेण सङ्घभेदस्य प्रयत्नः न कर्तव्यः। भिक्षु सङ्घस्य भिक्षुणीसङ्घस्य कोऽपि सदस्यः यदि अस्मिन् विषये कमपि प्रयत्नं कुर्यात् तर्हि तेन तया वा श्वेतवस्त्रं परिधाय सङ्घं परित्यज्य च अन्यत्र गन्तव्यम्। सङ्घपरिवारस्य सर्वेषां सर्वासां कृते च अयं नियमो वलवान् आसीत्। सम्राजा अशोकेन पुनरपि आदिष्टं यत्, महामात्राणां समीपे अस्य अनुशासनस्य एका प्रतिलिपिः अवश्यमेव स्यात्। अन्याः प्रतिलिपयः विहारस्य मठमध्ये एव न्यस्ताः भवेयुः। अनुशासन्य एका प्रतिलिपिः उपासकानां समीपेऽपि संरक्षिता तिष्ठेत्।

अस्मात् सारनाथस्तम्भस्य अनुशासनात् अवगन्तुं शक्यते यत्, येन यथार्थतया सर्वेषां मानवानां समीपे अनुशासनमिदं संगच्छेत् तत्र महाराजः अशोकः अतितरं गुरुत्वं समारोपितवान्। एतदेव अस्य अभिलेखस्य एकं पृथक्भूतं वैशिष्ट्यम्।

उपवासदिवसेषु महामात्राः उपासकाश्च अनुशासनमिदं पठन्ति जानन्ति च। सम्राजः अशोकस्य मतानुसारं सङ्घभेदः न कदापि करणीयः, यदि केनापि कयापि वा तत्क्रियते तर्हि तस्मै तस्यै वा दण्डः अवश्यमेव प्रदेयः। सङ्घभेदो नाम केनापि दुराचारेण कुवाक्येन वा सङ्घस्य नियमलङ्घनम्। मतानैक्यकारणात् यथा सङ्घस्य विनाशो मा भवेत् तदर्थं अशोकः कृतप्रयत्नः आसीत्। कृते च सङ्घभेदे श्वेतवस्त्रधारणं सङ्घात् अन्यत्र गमनं च दण्डरूपेण उपदिष्टम् आसीत्। परन्तु एतदपि सत्यं यत्, मतानैक्यं यदि युक्त्या युज्यते तर्हि तस्य कृते स्वाधीनतया चिन्तनस्य अवकाशः आसीत्। वस्तुतस्तु सङ्घभेदस्य उपदलनिर्माणस्य दण्डरूपेण अपसारणस्य प्रसङ्गःसमागतः, किञ्च पञ्चदिनानि व्याप्य दशदिनानि व्याप्य वा पृथक्तया स्थातव्यम्, षड्दिनानि व्याप्य च संयमेन कालः अतिक्रमणीयः। अपराधे स्वीकृते पुनः दण्डान्ते सः सङ्घमध्ये स्थातुं शक्नुयात्। नाशनम् अर्थात् सङ्घात् आवश्यिकतया चिरतया च विताडनं खलु सङ्घभेदस्य अन्तिमो दण्डः। सङ्घेन सह बौद्धधर्मस्य विविधैः सम्प्रदायैः संयोगस्थापनमासीत् महामात्राणां राजपुरुषाणां वा एकम् अन्यतमम् कार्यम् आसीदिति ज्ञायते। अतः सङ्घभेदवर्जनं खलु अस्याः लिपेः अन्तर्निहितं तात्पर्यम् इत्यलं विस्तरेण इति दिक्॥